# ।। श्री षोडशाधिकार प्रकरणम् ।।



रचयिता : श्रीमान् हरिभद्रसूरिः ।

# ।। षोडशाधिकार-प्रकरणम् ।।

(मूलमात्रम्)

: रचयिता :

याकिनी-महत्तरा-धर्म-सूनुः

**श्रीमान् हरिभद्रसूरिः ।**

: प्रकाशक :

**श्री जैन श्वेताम्बर मूर्तिपूजक संघ**

सीसोदरा - नवसारी

।। दक्षिण गुजरात ।।

ग्रन्थनाम - षोडशाधिकार प्रकरणम्

कर्ता - श्रीमान् हरिभद्रसूरिः

सम्पादकः - युग-प्रधान-कल्प-पूज्यपादाचार्यवर्य-श्रीमद्विजयरामचंद्र सूरीश्वरान्तिषद्वैराग्यरतिर्विजयो मुनिः ।

प्रकाशन-प्रेरकाः - सूरि-मंत्र-समाराधक पूज्याचार्य श्री विजय मुक्तिप्रभसूरीश्वराः ।

प्रकाशकः - श्री जैन श्वेताम्बर मूर्तिपूजक संघः - सीसोदरा, गुजरात ।

मुद्रकः - दुंदुभि प्रिन्टर्स, अमदावाद

प्राप्तिस्थानानि

**श्री जैन श्वेताम्बर मूर्तिपूजक संघ,**
मु. सीसोदरा, नवसारी,
दक्षिण गुजरात.

**र. छ. आराधना भवन**
सांढकूवा, नवसारी-३९६ ४४५
दूरभाष - (०२६३७) ५३५५६

**भूपेश भायाणी**
४८७/८८, रविवार पेठ, पूणे-४११ ००२
दूरभाष (०२०) ४५३०४४

**आ. श्री विजय दानसूरि ज्ञानमंदिर**
१५५१, कालुपुर रोड,
अमदावाद - ३८० ००१

## પ્રકાશકીય :

શ્રી જિનશાસનના મહાન જ્યોતિર્ધર, મહામહિમ, સ્મૃતિશેષ, સૂરિસમ્રાટ પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્ **વિજય રામચંદ્ર સૂરીશ્વરજી મહારાજા** તથા તેઓના પુણ્ય પરિવારનો અમારા શ્રી સીસોદરા શ્રી સંઘ ઉપર ખૂબ ખૂબ ઉપકાર છે.

ગત વર્ષે નવસારીમાં સ્વર્ગીય સૂરિસમ્રાટના પટ્ટાલંકાર કુશળ-અનુશાસક વર્તમાન-સુવિશાલ-ગચ્છાધિપતિ પૂજનીય આચાર્યદેવ શ્રીમદ્ **વિજય મહોદય સૂરીશ્વરજી મહારાજા**ની તારક આજ્ઞાથી શાસનપ્રભાવક પૂ. આચાર્યદેવ શ્રીમદ્ **વિજય વિચક્ષણ સૂરીશ્વરજી મહારાજા**, પૂજ્ય મુનિરાજ શ્રી **પુણ્ય રક્ષિત વિજયજી મ.સા.**, અમારા સીસોદરાના રત્ન પૂજ્ય મુનિરાજ શ્રી **અક્ષયબોધિ વિજયજી મ.સા.**, તથા મુનિરાજ શ્રી **આત્મરક્ષિત વિજયજી મ.સા.** આદિ ચાતુર્માસાર્થે બિરાજમાન હતા. ત્યારે અમારા શ્રી સંઘે જ્ઞાન ખાતામાંથી પ્રાચીન કોઈ સૂત્ર આદિ પ્રકાશિત થાય એ માટે વિનંતિ કરતા તેઓશ્રીએ પૂના બિરાજમાન શાસન પ્રભાવક પૂજ્ય આચાર્ય ભગવંત શ્રીમદ્ **વિજય જયકુંજર સૂરીશ્વરજી મ.સા.**ના પટ્ટપ્રભાવક-પ્રવચન પ્રભાવક પૂજ્ય આચાર્ય ભગવંત શ્રીમદ્ **વિજય મુક્તિપ્રભ સૂરીશ્વરજી મ.સા.**નું માર્ગદર્શન મેળવવાનું જણાવ્યું.

પૂજ્ય આચાર્ય ભગવંતે પ્રસ્તુત ગ્રંથ પ્રકાશિત કરવાનું અમૂલ્ય માર્ગદર્શન આપ્યું.

૧૪૪૪ ગ્રંથના રચયિતા પૂજ્ય આચાર્ય ભગવંત **શ્રીમદ્ હરિભદ્રસૂરીશ્વરજી** વિરચિત આ પ્રકરણનું સંપાદન સ્વર્ગીય સૂરિસમ્રાટના શિષ્યરત્ન પૂજ્ય મુનિપ્રવર શ્રી **વૈરાગ્યરતિ વિજયજી મ.સા.**એ કર્યું છે. માર્ગદર્શક આચાર્ય ભગવંત તેમજ સંપાદક મુનિપ્રવરના અમે ખૂબ ઋણી છીએ.

જ્ઞાન ખાતામાંથી પ્રકાશિત થયેલા આ ગ્રંથની ગૃહસ્થો પૂર્ણ કિંમત ચૂકવ્યા વિના માલિકી ન કરે તેવી વિનંતી.

**સીસોદરા જૈન સંઘ**
ગુજરાત

# સંયમી આત્માઓને અર્પતી...
# સીસોદરાની પાવની ધરતી...

અનાદિ અનંતકાલીન ચતુર્ગતિમાં કર્મજનિત વિભાવદશાને પરિણામે સંસાર પરિભ્રમણ અને કર્મની અકળ લીલાની અનુભૂતિ કરતાં કરતાં પુન્યસંચય - પાપવિલય થતાં પતનની ગતિમાંથી નીકળી ઉત્થાનના પરમપુનિત પંથે લઈ જનાર દેવદુર્લભ એવા વિરતિધર્મની પરિપાલના કરવા માટેના ઉત્તમ નરભવની પ્રાપ્તિ, તેમાંય મહાપુન્યોદયે સર્વોત્તમ, પરમતારક, પાપનાશક મૌનીન્દ્ર શાસન, જિનેન્દ્ર શાસનની પ્રાપ્તિ કરી પૂર્વજન્મજનિત સુસંસ્કારો અને સુયોગના સંસ્કારગ્રહણના યોગે સંસાર પક્ષનો નિપાત અને આત્મિક સ્વરૂપની પ્રાપ્તિનો પક્ષપાત જાગતાં કેટલાય આત્માઓ સર્વસુખકર, કર્મવન બાળવામાં દાવાનળ સમાન આત્મિક સુખની પ્રાપ્તિનું અમોઘ સાધન - પરાત્મ તત્ત્વની ખોજ કરવાનો અનોપમ માર્ગ એવું જે મહાભિનિષ્ક્રમણ તેની સ્વીકૃતિ કરે છે. તથા મુક્તિપથની સ્વીકૃતિ દ્વારા અને કર્મની તિરસ્કૃતિ દ્વારા મુક્તિની આવિષ્કૃતિ કેટલાક આત્માઓ કરે છે.

અમારો સિસોદરા જૈન સંઘ પણ ગૌરવાન્વિત બન્યો છે. કેમ કે અહીંની પાવની ધરતીએ જિનશાસનને ચરણે ચાર પુણ્યાત્માઓને અર્પણ કર્યા છે. આજ અમારી ગ્રામ્ય ભૂમિ પણ નવપલ્લવિત બની ન હોય તેમ ચાર પુણ્યાત્માને સંયમના સ્વાંગમાં જોઈને મહેકી ઉઠી છે, અને શ્રદ્ધાના પુષ્પો દ્વારા પુણ્યાત્માઓને અભિનંદી રહી છે. અમારી પાવની ધરતી ઉપર ઉત્પન્ન થયેલા સંયમપૂત આત્માઓ સ્મૃતિપથમાં આવતા અમારા હૈયાં આનંદવિભોર બની જાય છે.

ચાલો એ સંયમી આત્માઓનો પરિચય કરી આત્માને પાવન કરીએ. ભાવે વંદના કરી જન્મ સફળ કરીએ.

**ધન્ય માતા જેણે ઉદરે ધરિયા !**

**ધન્ય પિતા જિણ કુલે અવતરીયા !**

**ધન્ય સદ્ગુરુ જેણે દિક્ખિઆ એ !!**

## ૧. પૂજ્ય જ્યોતિર્વિદ મુનિપ્રવર શ્રી હેમેન્દ્ર વિજયજી મહારાજ સાહેબ

અબ્રામાના વતની, પિતાશ્રી માતાશ્રીના લાડકવાયા વૈરાગી બની પૂજ્યપાદ આચાર્ય દેવેશ શ્રીમદ્ વિજય લબ્ધિસૂરીશ્વરજી મહારાજના પ્રશિષ્ય બની સંયમની સાધના શરૂ કરી. તેમની જ્ઞાનાભ્યાસની મસ્તતા અજોડ હતી. જ્યોતિષ અને આગમનું તલસ્પર્શી જ્ઞાન પ્રશંસનીય હતું. એમની પ્રેરણાના પુષ્પરૂપ આ પુસ્તકનું પ્રકાશન છે. ઘણા કાળ સંયમ સાધના કરી ફણસા મુકામે સ્વર્ગવાસી બન્યા.

ધન્ય હો એ પુણ્યાત્માને ! ધન્ય હો એમના માતા-પિતાને ! વંદન કરીએ ભાવે...

## ૨. પૂજ્ય મુનિરાજ શ્રી હેતવિજયજી મહારાજ સાહેબ

જેઓના પિતાશ્રી ગુલાબચંદભાઈ, માતાશ્રી દેવીબેનની કુક્ષીથી માનવભવ લહી ધર્મસંસ્કાર તપ ત્યાગાદિની જીવનમાં આચરણાના પ્રભાવે સુખી ઘરના નબીરા છતાં વૈરાગ્યવાસી બની પૂ.આ.ભ. શ્રીમદ્ વિજય પ્રેમસૂરીશ્વરજી મહારાજ સાહેબના શિષ્યરત્ન પરમગીતાર્થ પૂ.પં. શ્રી હેમંત વિજય ગણિવર્ય (પાછળથી આચાર્યદેવશ્રી હીરસૂરિ મ.)ના શિષ્ય તરીકે વૃદ્ધવયમાં વિ.સ. ૨૦૧૮ કારતક વદ ૬ના શનિવારે સંયમી બની સુંદર સંયમ સાધના અને પ્રભુ ભક્તિ દ્વારા જીવનને નિર્મળ બનાવ્યું. વિ.સં. ૨૦૨૮નું ચાતુર્માસ પોતાના સંસારી વતન સિસોદરામાં પ.પૂ. મુનિરાજ શ્રી લલિતશેખર વિ.મ. પ.પૂ. મુનિરાજ શ્રી રાજશેખર વિ.મ. તથા પ.પૂ. મુનિરાજ શ્રી વિનય વિ.મ.ની સાથે થયું. તે ચાતુર્માસમાં આ.સુ. ૧૦ના રોજ તેઓશ્રીનો દેહવિલય થયો. અર્થાત, કાળધર્મ પામી સ્વર્ગવાસી બન્યા. એજ પુણ્યાત્માની ધર્મભાવનાના પ્રતિક સમા આજે પણ ગામમાં શ્રી કુંથુનાથ ભગવાનનું જિનાલય અને શ્રી ભીડભંજન પાર્શ્વનાથ ભગવાનનું ઘર દહેરાસર મૌજુદ છે.

## ૩. પૂજ્ય મુનિરાજ શ્રી અક્ષયબોધિ વિજયજી મહારાજ સાહેબ

જેઓશ્રીના પિતાશ્રી ગુલાબચંદભાઈ તથા માતુશ્રીએ પુણ્યાત્મા બાલ્યવયથી ધર્મથી સંસ્કારિત અને દિક્ષાની ભાવનાવાળા છતાં કર્મયોગે સાંસારિક જીવનનો પ્રારંભ કર્યો. છતાં ધર્મમય જીવન અને સદ્ગુરુ સમાગમે વૈરાગ્ય જાગૃત થતાં વિ.સં. ૨૦૪૭માં વૈશાખ સુદ ૧૦નાં સિસોદરામાં સંયમ સ્વીકારી પૂ. ગચ્છાધિપતિ શ્રીમદ્ વિજયરામચંદ્ર સૂરી મ.સા. ના પ્રશિષ્ય પૂ.આ.ભ. શ્રીમદ્ વિજય જયકુંજરસૂરિ મ.સા.ના શિષ્યરત્ન બન્યા. મોટી વયે દિક્ષા ગ્રહણ કરી સંયમ સાધના - તપ - ત્યાગાદિ ગુણોની પ્રાપ્તિ કરવા દ્વારા આત્મકલ્યાણ સાધતાં પૃથ્વીતલે વિચરી રહ્યા છે.

ધન્ય હો ગુરૂભગવંતને !<br>
ધન્ય હો માત - તાતને ! નમન કરીએ લળીલળી.

## ૪. પૂજ્ય સાધ્વીજીશ્રી સૌમ્યજ્યોતિશ્રીજી મહારાજ સાહેબ

પિતાશ્રી સ્વ. ગુણવંતલાલ પાનાચંદ શાહ તથા માતાશ્રી શાંતાબેન જેઓના ઉત્તમ કુળમાં આ આત્માનું અવતરણ થયું બાલ્યવયથી જ ધર્મભાવનાવાસિત અંતઃકરણ, આંતરિક વિરાગવેલડી વિસ્તરતાં ભૌતિકવાદના ભોગવિલાસ અને જડવાદના આકર્ષણમાં નહિ લેપાતા, કોલેજિયન જીવન જીવતા છતાં, વૈભવની સામગ્રીને સાપ જેમ કાંચળી ઉતારે તેમ છોડીને વીશ વર્ષની વયે બાલબ્રહ્મચારી બની અણગારી આલયમાં વિ.સં. ૨૦૨૭નાં ફાગણ સુદ ૪ના રવિવારે પૂજ્ય ગચ્છાધિપતિ, વ્યાખ્યાન વાચસ્પતિ આચાર્ય દેવેશ શ્રીમદ્ વિજય રામચંદ્રસૂરિ મ.સા.ના આજ્ઞાવર્તી પૂ.સા. શ્રી. સ્વ. દર્શનશ્રીજી મ.સા.ના શિષ્યરત્ના પૂ.સા. શ્રી જયપ્રજ્ઞાશ્રીજી મ.સા.ના શિષ્યા બની સંયમની સાધના કરી રહ્યા છે. પૂજ્ય ગુરૂણી સા. શ્રી જયપ્રજ્ઞાશ્રીજી મ.સા. કાળધર્મ પામતાં જ્ઞાન-ધ્યાનમાં મસ્તતા અનુભવતા, પરમાત્મભક્તિમાં લીન બની પૂ.સા. શ્રી હર્ષપૂર્ણાશ્રીજી મ.સા.ની નિશ્રામાં સંયમ જીવનની આરાધના કરતાં પૃથ્વીતલે વિચરી રહ્યા છે.

**ધન્ય હો ! એ ગુરૂણીને !**

**ધન્ય હો એમના માતા-પિતાને !**

**વંદન કરીએ ભક્તિભાવે**

**"ઉત્તમના ગુણ ગાવતાં ગુણ આવે નિજ અંગ" એ ન્યાયે ગુણીજનના ગુણનું કીર્તન અને ગુણાનુરાગથી અમારો શ્રી જૈનસંઘ કૃતકૃત્ય બને અને એ પુણ્યાત્માઓ આત્મકલ્યાણ સાધી વહેલા મુક્તિ સંગી બને અને અમને પણ બનાવે એ જ શુભેચ્છા !**

લિ.

**સીસોદરા જૈન સંઘ**

## मनोगतम्

धर्मतो याकिन-महत्तरा-सूनु-परमर्षि **श्रीमद्-हरिभद्रसूरि** प्रणितं **'षोडशाधिकार प्रकरणं'** मूलरूपेण प्रकाश्यतेऽस्यां पुस्तिकायाम् । सटीकस्य तस्य प्रकाशनावसरे पूज्यपादैः प्रभावकैराचार्यैःश्रीमद् **विजयमुक्तिप्रभसूरिभिः** प्रेरितोऽहं सूत्राध्ययन-रसिकानां साधु- साध्वी-प्रभृतिसाधकानां सुखेन मुखपाठसिद्धयै मूलमात्रस्य संपादनार्थम् । महतीयमानन्दवार्ता यत् संघेऽत्रैवंविधस्यार्थगंभीरस्य ग्रन्थस्य कण्ठस्थीकरणद्वारेण हृदयप्रतिष्ठापनार्थं प्रयतते साधकवर्गः । हृदयस्थितस्य आप्तवचनरूपशास्त्रस्य सर्व-सिद्धि-मूलत्वं स्वयमेव ख्यापितं परमर्षिभिः प्रकरणेऽस्मिन् । एवं च शास्त्रमुखपाठपरंपरया प्राप्तं हृदयस्थितं शास्त्रमेव वीतरागपुरस्कारादिद्वारेण सर्व-सिद्धि फलं न पुस्तकस्थं शब्दमात्रमिति फलितम् । अत एवोक्तम्

**पुस्तकस्था तु या विद्या परहस्तगतं धनम् ।**
**कार्यकाले समुत्पन्नें न सा विद्या न तद् धनम् ।।**

संघे चतुर्विधेऽपि लोपाभिमुखं गच्छन्ती प्राचीनेयं मुखपाठपरंपरा पुनरपि उज्जागरिष्यति एवंविधेन प्रयासेनेत्याशासे । प्रकाशन-साहाय्यंकः **सीसोदरा संघोऽपि** साधुवादार्हः ।

लघुकृतिरियं वर्तमानगच्छाधिनायकानां कुशलानुशास्तॄणां पूज्यतमानां आचार्य प्रवराणां श्रीमद् **विजयमहोदयसूरीश्वराणां** समर्प्य कृतार्थीभावमनु भवति सिद्धान्तवाचस्पतीनां पूज्यतमानामाचार्यचन्द्राणां श्रीमद्**विजयरामचन्द्रसूरीश्वराणां** शिष्यलेशः पितृगुरु-मुनिप्रवरश्री**संवेगरतिविजयानां** अनुजमुनिवरश्री**प्रशमरतिविजयस्य** च सतीर्थ्यबांधवो **वैराग्यरतिविजया**भिधो मुनिः विक्रमस्य २०५५ तमे वर्षे विदर्भदेशस्थ नागपुर महानगर मण्डनश्रीमुनिसुव्रतजिनप्रासादस्य त्रयोविंशतितमे प्रतिष्ठादिने फाल्गुनस्य कृष्णैकादशी तिथौ शनिवासरे । इति ।

# अनुक्रमः

| विषय | पत्रम् |
|---|---|
| १. सद्धर्मपरीक्षकाधिकारः | १ |
| २. सद्धर्मदेशनाधिकारः | २ |
| ३. सद्धर्मलक्षणाधिकारः | ३ |
| ४. सद्धर्म-सिद्धि-लिंगाधिकारः | ५ |
| ५. लोकोत्तर-तत्त्व-संप्रात्यधिकारः | ६ |
| ६. जिनभवनविधानाधिकारः | ७ |
| ७. जिनबिम्ब-विधानाधिकारः | ९ |
| ८. जिनबिम्ब-प्रतिष्ठाधिकारः | १० |
| ९. जिन-पूजाधिकारः | ११ |
| १०. सदनुष्ठानाधिकारः | १३ |
| ११. सज्ज्ञानाधिकारः | १४ |
| १२. दीक्षाधिकारित्वाधिकारः | १५ |
| १३. साधु-सच्चेष्टाधिकारः | १७ |
| १४. सालम्बन-योगाधिकारः | १८ |
| १५. ध्येय-स्वरूपाधिकारः | १९ |
| १६. समरसापत्त्यधिकारः | २१ |

# ।। षोडशाधिकार प्रकरणं मूलमात्रम् ।।

## ।। प्रथमोऽधिकारः ।।

१. प्रणिपत्य जिनं वीरं, सद्धर्म-परीक्षकादि-भावानाम् ।
लिङ्गादि भेदतः खलु, वक्ष्ये किञ्चित्समासेन ।।१-१।।

२. बालः पश्यति लिङ्गं, मध्यम-बुद्धिर्विचारयति वृत्तम् ।
आगम-तत्त्वं तु बुधः, परीक्षते सर्व-यत्नेन ।।१-२।।

३. बालो ह्यसदारम्भो, मध्यम-बुद्धिस्तु मध्यमाचारः ।
ज्ञेय इह तत्त्वमार्गे, बुधस्तु मार्गानुसारी यः ।।१-३।।

४. बाह्यं लिङ्गमसारं, तत्प्रतिबद्धा न धर्म-निष्पत्तिः ।
धारयति कार्य-वशतो, यस्माञ्च विडम्बकोऽप्येतत् ।।१-४।।

५. बाह्य-ग्रन्थ-त्यागान्न चारु नन्वत्र तदितरस्यापि ।
कञ्चुक-मात्र-त्यागान्न हि भुजगो निर्विषो भवति ।।१- ५।।

६. मिथ्याचार-फलमिदं ह्यपरैरपि गीतमशुभ-भावस्य ।
सूत्रेऽप्यविकलमेतत्प्रोक्तममेध्योत्करस्यापि ।।१- ६।।

७. वृत्तं चारित्रं खल्वसदारम्भविनिवृत्तिमत्तञ्च ।
सदनुष्ठानं प्रोक्तं कार्ये हेतूपचारेण ।।१-७।।

८. परिशुद्धमिदं नियमादान्तर-परिणामतः सुपरिशुद्धात् ।
अन्यदतोऽन्यस्मादपि बुध-विज्ञेयं त्वचारुतया ।।१-८।।

९. गुरुदोषारम्भितया लघुष्वकरण-यत्नतो निपुण-धीभिः ।
सन्निन्दादेश्च तथा ज्ञायत एतन्नियोगेन ।।१- ९।।

१०. आगम-तत्त्वं ज्ञेयं तद्दृष्टेष्टाविरुद्ध-वाक्यतया ।
उत्सर्गादि-समन्वितमलमैदम्पर्य-शुद्धं च ।।१-१०।।

११. आत्माऽस्ति स परिणामी बद्धः सत्कर्मणा विचित्रेण ।
मुक्तश्च तद्वियोगाद्धिंसाहिंसादि तद्धेतुः ।।१-११।।

१२. परलोकविधौ मानं वचनं तदतीन्द्रियार्थ-दृग्व्यक्तम् ।
सर्वमिदमनादि स्यादैदम्पर्यस्य शुद्धिरिति ।।१- १२।।

१३. बालादिभावमेवं सम्यग्विज्ञाय देहिनां गुरुणा ।
सद्धर्म-देशनापि हि कर्त्तव्या तदनुसारेण ।।१-१३।।

१४. यद्भाषितं मुनीन्द्रैः पापं खलु देशना परस्थाने ।
उन्मार्ग-नयनमेतद्भव-गहने दारुण-विपाकम् ।।१-१४।।

१५. हितमपि वायोरौषधमहितं तच्छ्लेष्मणो यथात्यन्तम् ।
सद्धर्म-देशनौषधमेवं बालाद्यपेक्षमिति ।।१-१५।।

१६. एतद्विज्ञायैवं यथोचितं शुद्धभावसम्पन्नः ।
विधिवदिह यः प्रयुङ्क्ते करोत्यसौ नियमतो बोधिम् ।।१-१६।।

## ।। द्वितीयोऽधिकारः ।।

१७. बालादीनामेषां यथोचितं तद्विदो विधिर्गीतः ।
सद्धर्मदेशनायामयमिह सिद्धान्त-तत्त्वज्ञैः ।।२-१।।

१८. बाह्य-चरण-प्रधाना कर्त्तव्या देशनेह बालस्य ।
स्वयमपि च तदाचारस्तदग्रतो नियमतः सेव्यः ।।२-२।।

१९. सम्यग् लोचविधानं ह्यनुपानत्कत्वमथ धरा शय्या ।
प्रहर-द्वयं रजन्याः स्वापः शीतोष्णसहनं च ।।२-३।।

२०. षष्ठाष्टमादिरूपं चित्रं बाह्यं तपो महाकष्टम् ।
अल्पोपकरण-सन्धारणं च तच्छुद्धता चैव ।।२-४।।

२१. गुर्वी पिण्ड-विशुद्धिश्चित्रा द्रव्याद्यभिग्रहाश्चैव ।
विकृतीनां सन्त्यागस्तथैक-सिक्थादि-पारणकम् ।।२-५।।

२२. अनियत-विहार-कल्पः कायोत्सर्गादि-करणमनिशं च ।
इत्यादि बाह्यमुच्चैः कथनीयं भवति बालस्य ।।२-६।।

२३. मध्यम-बुद्धेस्त्वीर्या-समिति-प्रभृति त्रिकोटि-परिशुद्धम् ।
आद्यन्त-मध्य-योगैर्हितदं खलु साधु-सद्वृत्तम् ।।२-७।।

२४. अष्टौ साधुभिरनिशं मातर इव मातरः प्रवचनस्य ।
नियमेन न मोक्तव्याः परमं कल्याणमिच्छद्भिः ।।२-८।।

२५. एतत्सचिवस्य सदा साधोर्नियमान्न भवभयं भवति ।
भवति च हितमत्यन्तं फलदं विधिनाऽऽगमग्रहणम् ।।२-९।।

२६. गुरुपारतन्त्र्यमेव च तद्बहुमानात्सदाशयानुगतम् ।
परमगुरुप्राप्तेरिह बीजं तस्माच्च मोक्ष इति ।।२-१०।।

२७. इत्यादि साधुवृत्तं मध्यमबुद्धेः सदा समाख्येयम् ।
आगमतत्त्वं तु परं बुधस्य भावप्रधानं तु ।।२- ११।।

२८. वचनाराधनया खलु धर्मस्तद्बाधया त्वधर्म इति ।
इदमत्र धर्मगुह्यं सर्वस्वं चैतदेवास्य ।।२-१२।।

२९. यस्मात्प्रवर्त्तकं भुवि निवर्त्तकं चान्तरात्मनो वचनम् ।
धर्मश्चैतत्संस्थो मौनीन्द्रं चैतदिह परमम् ।।२-१३।।

३०. अस्मिन् हृदयस्थे सति हृदयस्थस्तत्त्वतो मुनीन्द्र इति ।
हृदयस्थिते च तस्मिन्नियमात्सर्वार्थसंसिद्धिः ।।२-१४।।

३१. चिन्तामणिः परोऽसौ तेनैवं[A] भवति समरसापत्तिः ।
सैवेह योगिमाता निर्वाणफलप्रदा प्रोक्ता ।।२- १५।।

३२. इति यः कथयति धर्मं विज्ञायौचित्ययोगमनघमतिः ।
जनयति स एनमतुलं श्रोतृषु निर्वाण-फलदमलम् ।।२-१६।।

## ।। तृतीयोऽधिकारः ।।

३३. अस्य स्वलक्षणमिदं धर्मस्य बुधैः सदैव विज्ञेयम् ।
सर्वागम-परिशुद्धं यदादिमध्यान्त-कल्याणम् ।।३- १।।

३४. धर्मश्चित्तप्रभवो यतः क्रियाधिकरणाश्रयं कार्यम् ।
मल-विगमेनैतत्खलु पुष्ट्यादिमदेष विज्ञेयः ।।३- २।।

३५. रागादयो मलाः खल्वागम-सद्योगतो विगम एषाम् ।
तदयं क्रियात एव हि पुष्टिः शुद्धिश्च चित्तस्य ।।३-३।।

३६. पुष्टिः पुण्योपचयः शुद्धिः पापक्षयेण निर्मलता ।
अनुबन्धिनि द्वयेऽस्मिन् क्रमेण मुक्तिः परा ज्ञेया ।।३-४।।

A. तेने यं इति पाठांतरम् ।

३७. न प्रणिधानाद्याशयसंविद्-व्यतिरेकतोऽनुबन्धि तत् ।
भिन्नग्रन्थेर्निर्मलबोधवतः स्यादियं च परा ।।३-५।।

३८. प्रणिधि-प्रवृत्ति-विघ्न-जय-सिद्धि-विनियोग-भेदतः प्रायः ।
धर्मज्ञैराख्यातः शुभाशयः पञ्चधाऽत्र विधौ ।।३-६।।

३९. प्रणिधानं तत्समये स्थितिमत्तदधः कृपानुगं चैव ।
निरवद्य-वस्तु-विषयं परार्थ-निष्पत्ति-सारं च ।।३-७।।

४०. तत्रैव तु प्रवृत्तिः शुभसारोपायसङ्गतात्यन्तम् ।
अधिकृत-यत्नातिशयादौत्सुक्य-विवर्जिता चैव ।।३-८।।

४१. विघ्न-जयस्त्रिविधः खलु विज्ञेयो हीन-मध्यमोत्कृष्टः ।
मार्ग इह कण्टक-ज्वर-मोह-जय-समः प्रवृत्ति-फलः ।।३-९।।

४२. सिद्धिस्तत्तद्धर्म-स्थानावाप्तिरिह तात्त्विकी ज्ञेया ।
अधिके विनयादियुता हीने च दयादि-गुण-सारा ।।३-१०।।

४३. सिद्धेश्चोत्तरकार्यं विनियोगोऽवन्ध्यमेतदेतस्मिन् ।
सत्यन्वयसम्पत्त्या सुन्दरमिति तत्परं यावत् ।।३-११।।

४४. आशय-भेदा एते सर्वेऽपि हि तत्त्वतोऽवगन्तव्याः ।
भावोऽयमनेन विना चेष्टा द्रव्यक्रिया तुच्छा ।।३-१२।।

४५. अस्माच्च सानुबन्धाच्छुद्ध्यन्तोऽवाप्यते द्रुतं क्रमशः ।
एतदिह धर्मतत्त्वं परमो योगो विमुक्ति-रसः ।।३-१३।।

४६. अमृत-रसास्वादज्ञः कुभक्त-रस-लालितोऽपि बहु-कालम् ।
त्यक्त्वा तत्क्षणमेनं वाञ्छत्युच्चैरमृतमेव ।।३-१४।।

४७. एवं त्वपूर्वकरणात्सम्यक्त्वामृतरसज्ञ इह जीवः ।
चिरकालासेवितमपि न जातु बहु-मन्यते पापम् ।।३-१५।।

४८. यद्यपि कर्मनियोगात् करोति तत्तदपि भाव-शून्यमलम् ।
अत एव धर्म-योगात् क्षिप्रं तत्सिद्धिमाप्नोति ।।३-१६।।

## ।। चतुर्थोऽधिकारः ।।

४९. सिद्धस्य चास्य सम्यग्लिङ्गान्येतानि धर्म-तत्त्वस्य ।
विहितानि तत्त्वविद्भिः सुखावबोधाय भव्यानाम् ।।४-१।।

५०. औदार्यं दाक्षिण्यं पापजुगुप्साऽथ निर्मलो बोधः ।
लिङ्गानि धर्मसिद्धेः प्रायेण जनप्रियत्वं च ।।४-२।।

५१. औदार्यं कार्पण्य-त्यागाद्विज्ञेयमाशय-महत्त्वम् ।
गुरुदीनादिष्वौचित्त्यवृत्ति कार्ये तदत्यन्तम् ।।४-३।।

५२. दाक्षिण्यं परकृत्येष्वपि योगपरः शुभाशयो ज्ञेयः ।
गाम्भीर्य-धैर्य-सचिवो मात्सर्य-विघातकृत्परमः ।।४-४।।

५३. पाप-जुगुप्सा तु तथा सम्यक्परिशुद्धचेतसा सततम् ।
पापोद्वेगोऽकरणं तदचिन्ता चेत्यनुक्रमतः ।।४-५।।

५४. निर्मलबोधोऽप्येवं शुश्रूषाभावसंभवो ज्ञेयः ।
शम-गर्भ-शास्त्र-योगाच्छ्रुत-चिन्ता-भावना-सारः ।।४-६।।

५५. युक्तं जनप्रियत्वं शुद्धं तद्धर्म-सिद्धिफलदमलम् ।
धर्म-प्रशंसनादेर्बीजाधानादिभावेन ।।४-७।।

५६. आरोग्ये सति यद्वद् व्याधिविकारा भवन्ति नो पुंसाम् ।
तद्वद्धर्मारोग्ये पापविकारा अपि ज्ञेयाः ।।४-८।।

५७. तत्रास्य विषय-तृष्णा प्रभवत्युच्चैर्न दृष्टि-सम्मोहः ।
अरुचिर्न धर्म-पथ्ये न च पापा क्रोध-कण्डूतिः ।।४-९।।

५८. गम्यागम्य-विभागं त्यक्त्वा सर्वत्र वर्त्तते जन्तुः ।
विषयेष्ववितृप्तात्मा यतो भृशं विषय-तृष्णेयम् ।।४-१०।।

५९. गुणतस्तुल्ये तत्त्वे संज्ञा-भेदागमान्यथादृष्टिः ।
भवति यतोऽसावधमो दोषः खलु दृष्टि-संमोहः ।।४-११।।

६०. धर्म-श्रवणेऽवज्ञा तत्त्वरसास्वाद-विमुखता चैव ।
धार्मिक-सत्त्वासक्तिश्च धर्मपथ्येऽरुचेर्लिङ्गम् ।।४-१२।।

६१. सत्येतर-दोष-श्रुति-भावादन्तर्बहिश्च यत्स्फुरणम् ।
अविचार्य कार्यतत्त्वं तच्चिह्नं क्रोधकण्डूतेः ।।४-१३।।

६२. एते पापविकारा न प्रभवन्त्यस्य धीमतः सततम् ।
धर्मामृत-प्रभावाद्भवन्ति मैत्र्यादयश्च गुणाः ।।४-१४।।

६३. पर-हित-चिन्ता मैत्री पर-दुःख-विनाशिनी तथा करुणा ।
पर-सुख-तुष्टिर्मुदिता परदोषोपेक्षणमुपेक्षा ।।४-१५।।

६४. एतज्जिन-प्रणीतं लिङ्गं खलु धर्म-सिद्धिमज्जन्तोः ।
पुण्यादि-सिद्धि-सिद्धेः सिद्धं सद्धेतु-भावेन ।।४-१६।।

## ।। पञ्चमोऽधिकारः ।।

६५. एवं सिद्धे धर्मे सामान्येनेह लिङ्गसंयुक्ते ।
नियमेन भवति पुंसां लोकोत्तर-तत्त्व-सम्प्राप्तिः ।।५-१७।।

६६. आद्यं भावारोग्यं बीजं चैषा परस्य तस्यैव ।
अधिकारिणो नियोगाच्चरम इयं पुद्गलावर्त्ते ।।५-१८।।

६७. स भवति कालादेव प्राधान्येन सुकृतादिभावेऽपि ।
ज्वर-शमनौषध-समय-वदिति समयविदो विदुर्निपुणम् ।।५-१९।।

६८. नागमवचनं तदधः सम्यक्परिणमति नियम एषोऽत्र ।
शमनीयमिवाभिनवे ज्वरोदयेऽकाल इति कृत्वा ।।५-२०।।

६९. आगमदीपेऽध्यारोप-मण्डलं तत्त्वतोऽसदेव तथा ।
पश्यन्त्यपवादात्मकमविषय इह मन्द-धी-नयनाः ।।५-२१।।

७०. तत एवाविधिसेवा दानादौ तत्प्रसिद्ध-फल एव ।
तत्तत्वदृशामेषा पापा कथमन्यथा भवति ।।५-२२।।

७१. येषामेषा तेषामागम-वचनं न परिणतं सम्यक् ।
अमृत-रसास्वादज्ञः को नाम विषे प्रवर्त्तेत ।।५-२३।।

७२. तस्माच्चरमे नियमादागमवचनमिह पुद्गलावर्ते ।
परिणमति तत्त्वतः खलु स चाधिकारी भवत्यस्याः ।।५-२४।।

७३. आगम-वचन-परिणतिर्भव-रोग-सदौषधं यदनपायम् ।
तदिह परः सद्बोधः सदनुष्ठानस्य हेतुरिति ।।५-९।।

७४. दश-संज्ञा-विष्कम्भण-योगे सत्यविकलं ह्यदो भवति ।
पर-हित-निरतस्य सदा गम्भीरोदार-भावस्य ।।५-१०।।

७५. सर्वज्ञ-वचनमागम-वचनं यत्परिणते ततस्तस्मिन् ।
नासुलभमिदं सर्वं ह्युभय-मल-परिक्षयात्पुंसाम् ।।५-११।।

७६. विधि-सेवा दानादौ सूत्रानुगता तु सा नियोगेन ।
गुरु-पारतंत्र्य-योगादौचित्याच्चैव सर्वत्र ।।५-१२।।

७७. न्यायात्तं स्वल्पमपि हि भृत्यानुपरोधतो महादानम् ।
दीन-तपस्व्यादौ गुर्वनुज्ञया दानमन्यत्तु ।।५-१३।।

७८. देव-गुण-परिज्ञानात्तद्भावानुगतमुत्तमं विधिना ।
स्यादादरादियुक्तं यत्तद्देवार्चनं चेष्टम् ।।५-१४।।

७९. एवं गुरु-सेवादि च काले सद्योगविघ्नवर्जनया ।
इत्यादि-कृत्य-करणं लोकोत्तर-तत्त्व-सम्प्राप्तिः ।।५-१५।।

८०. इतरेतर-सापेक्षा त्वेषा पुनराप्त-वचन-परिणत्या ।
भवति यथोदित-नीत्या पुंसां पुण्यानुभावेन ।।५-१६।।

## ।। षष्ठोऽधिकारः ।।

८१. अस्यां सत्यां नियमाद्विधि-वज्जिनभवनकारणविधानम् ।
सिद्ध्यति परम-फलमलं ह्यधिकार्यारम्भकत्त्वेन ।।६-१।।

८२. न्यायार्जित-वित्तेशो मतिमान् स्फीताशयः सदाचारः ।
गुर्वादिमतो जिन-भवन-कारणस्याधिकारीति ।।६-२।।

८३. कारण-विधानमेतच्छुद्धा भूम्रिर्दलं च दार्वादि ।
भृतकानतिसन्धानं स्वाशयवृद्धिः समासेन ।।६-३।।

८४. शुद्धा तु वास्तु-विद्या-विहिता सन्न्यायतश्च योपात्ता ।
न परोपतापहेतुश्च सा मुनीन्द्रैः समाख्याता ।।६-४।।

८५. शास्त्र-बहुमानतः खलु सच्चेष्टातश्च धर्मनिष्पत्तिः ।
पर-पीडा-त्यागेन च विपर्ययात्पापसिद्धिरिव ।।६- ५।।

८६. तत्रासन्नोऽपि जनोऽसम्बन्ध्यपि दानमानसत्कारैः ।
कुशलाशयवान् कार्यो नियमाद्बोध्यङ्गमयमस्य ।।६-६।।

८७. दलमिष्टकादि तदपि च शुद्धं तत्कारिवर्गतः क्रीतम् ।
उचित-क्रयेण यत्स्यादानीतं चैव विधिना तु ।।६-७।।

८८. दार्वपि च शुद्धमिह यत्नानीतं देवताद्युपवनादेः ।
प्रगुणं सार-वदभिनवमुच्चैर्ग्रन्थ्यादि-रहितं च ।।६-८।।

८९. सर्वत्र शकुन-पूर्वं ग्रहणादावत्र वर्त्तितव्यमिति ।
पूर्ण-कलशादि-रूपश्चित्तोत्साहानुगः शकुनः ।।६-९।।

९०. भृतका अपि कर्त्तव्या य इह विशिष्टाः स्वभावतः केचित् ।
यूयमपि गोष्ठिका इह वचनेन सुखं तु ते स्थाप्याः ।।६-१०।।

९१. अतिसन्धानं चैषां कर्त्तव्यं न खलु धर्म-मित्राणाम् ।
न व्याजादिह धर्मो भवति तु शुद्धाशयादेव ।।६-११।।

९२. देवोद्देशेनैतद् गृहिणां कर्तव्यमित्यलं शुद्धः ।
अनिदानः खलु भावः स्वाशय इति गीयते तज्ज्ञैः ।।६-१२।।

९३. प्रति-दिवसमस्य वृद्धिः कृताकृतप्रत्युपेक्षणविधानात् ।
एवमिदं क्रियमाणं शस्तमिह निदर्शितं समये ।।६-१३।।

९४. एतदिह भावयज्ञः सद्गृहिणो जन्म-फलमिदं परमम् ।
अभ्युदयाव्युच्छित्त्या नियमादपवर्ग-बीजमिति ।।६-१४।।

९५. देयं तु न साधुभ्यस्तिष्ठन्ति यथा च ते तथा कार्यम् ।
अक्षय-नीव्या ह्येवं ज्ञेयमिदं वंशतरकाण्डम् ।।६-१५।।

९६. यतनातो न च हिंसा यस्मादेषैव तन्निवृत्तिफला ।
तदधिक-निवृत्ति-भावाद्विहितमतोऽदुष्टमेतदिति ।।६-१६।।

## ।। सप्तमोऽधिकारः ।।

९७. जिन-भवने तद्बिम्बं कारयितव्यं द्रुतं तु बुद्धिमता ।
साधिष्ठानं ह्येवं तद्भवनं वृद्धि-मद्भवति ।।७-१।।

९८. जिन-बिम्ब-कारण-विधिः काले पूजा-पुरस्सरं कर्तुः ।
विभवोचितमूल्याऽर्पणमनघस्य शुभेन भावेन ।।७-२।।

९९. नार्पणमितरस्य तथा युक्त्या वक्तव्यमेव मूल्यमिति ।
काले च दानमुचितं शुभभावेनैव विधिपूर्वम् ।।७-३।।

१००. चित्त-विनाशो नैवं प्रायः सञ्जायते द्वयोरपि हि ।
अस्मिन् व्यतिकर एष प्रतिषिद्धो धर्म-तत्त्वज्ञैः ।।७-४।।

१०१. एष द्वयोरपि महान् विशिष्ट-कार्य-प्रसाधकत्त्वेन ।
सम्बन्ध इह क्षुण्णं न मिथः सन्तः प्रशंसन्ति ।।७-५।।

१०२. यावन्तः परितोषाः कारयितुस्तत्समुद्भवाः केचित् ।
तद्बिम्बकारणानीह तस्य तावन्ति तत्त्वेन ।।७-६।।

१०३. अप्रीतिरपि च तस्मिन् भगवति परमार्थ-नीतितो ज्ञेया ।
सर्वापायनिमित्तं ह्येषा पापा न कर्त्तव्या ।।७-७।।

१०४. अधिक-गुणस्थैर्नियमात् कारयितव्यं स्वदौर्हृदैर्युक्तम् ।
न्यायार्जितवित्तेन तु जिनबिम्बं भावशुद्धेन ।।७-८।।

१०५. अत्रावस्था-त्रय-गामिनो बुधैर्दोर्हदाः समाख्याताः ।
बालाद्याश्चैत्ता यत्तत्क्रीडनकादि देयमिति ।।७-९।।

१०६. यद्यस्य सत्कमनुचितमिह वित्ते तस्य तज्जमिह पुण्यम् ।
भवतु शुभाशय-करणादित्येतद्भावशुद्धं स्यात् ।।७-१०।।

१०७. मन्त्र-न्यासश्च तथा प्रणव-नमःपूर्वकं च तन्नाम ।
मन्त्रः परमो ज्ञेयो मनन-त्राणे ह्यतो नियमात् ।।७-११।।

१०८. बिम्बं महत्सुरूपं कनकादिमयं च यः खलु विशेषः ।
नास्मात्फलं विशिष्टं भवति तु तदिहाशय-विशेषात् ।।७-१२।।

१०९. आगम-तन्त्रः सततं तद्वद्भक्त्यादि-लिङ्ग-संसिद्धः ।
चेष्टायां तत्स्मृतिमान् शस्तः खल्वाशयविशेषः ।।७-१३।।

११०. एवंविधेन यद्बिम्बकारणं तद्वदन्ति समयविदः ।
लोकोत्तरमन्यदतो लौकिकमभ्युदयसारं च ।।७- १४।।

१११. लोकोत्तरं तु निर्वाणसाधकं परमफलमिहाश्रित्य ।
अभ्युदयोऽपि हि परमो भवति त्वत्रानुषङ्गेण ।।७-१५।।

११२. कृषिकरण इव पलालं नियमादत्रानुषङ्गिकोऽभ्युदयः ।
फलमिह धान्यावाप्तिः परमं निर्वाणमिव बिम्बात् ।।७-१६।।

## ।। अष्टमोऽधिकारः ।।

११३. निष्पन्नस्यैवं खलु जिन-बिम्बस्योदिता प्रतिष्ठाऽऽशु ।
दश-दिवसाभ्यन्तरतः सा च त्रिविधा समासेन ।।८-१।।

११४. व्यक्त्याख्या खल्वेका क्षेत्राख्या चापरा महाख्या च ।
यस्तीर्थकृद्यदा किल तस्य तदाद्येति समयविदः ।।८-२।।

११५. ऋषभाद्यानां तु तथा सर्वेषामेव मध्यमा ज्ञेया ।
सप्तत्यधिकशतस्य तु चरमेह महाप्रतिष्ठेति ।।८- ३।।

११६. भवति च खलु प्रतिष्ठा निज-भावस्यैव देवतोद्देशात् ।
स्वात्मन्येव परं यत्स्थापनमिह वचननीत्योच्चैः ।।८-४।।

११७. बीजमिदं परमं यत्परमाया एव समरसापत्तेः ।
स्थाप्येन तदपि मुख्या हन्तैषैवेति विज्ञेया ।।८- ५।।

११८. मुक्त्यादौ तत्त्वेन प्रतिष्ठिताया न देवतायास्तु ।
स्थाप्ये न च मुख्येयं तदधिष्ठानाद्यभावेन ।।८- ६।।

११९. इज्यादेर्न च तस्या उपकारः कश्चिदत्र मुख्य इति ।
तदतत्त्वकल्पनैषा बालक्रीडासमा भवति ।।८-७।।

१२०. भावरसेन्द्रात्तु ततो महोदयाज्जीवतास्वरूपस्य ।
कालेन भवति परमाऽप्रतिबद्धा सिद्धकाञ्चनता ।।८-८।।

१२१. वचनानल-क्रियातः कर्मेन्धन-दाहतो यतश्चैषा ।
इतिकर्तव्यतयाऽतः सफलैषाऽप्यत्र भावविधौ ।।८-९।।

१२२. एषा च लोक-सिद्धा शिष्ट-जनापेक्षयाऽखिलैवेति ।
प्रायो नानात्वं पुनरिह मन्त्रगतं बुधाः प्राहुः ।।८-१०।।

१२३. आवाहनादि सर्वं वायुकुमारादिगोचरं चात्र ।
सम्मार्जनादि-सिद्ध्यै कर्त्तव्यं मन्त्र-पूर्वं तु ।।८-११।।

१२४. न्यास-समये तु सम्यक्सिद्धानुस्मरण-पूर्वकमसङ्गम् ।
सिद्धौ तत्स्थापनमिव कर्त्तव्यं स्थापनं मनसा ।।८-१२।।

१२५. बीज-न्यासः सोऽयं मुक्तौ भाव-विनिवेशतः परमः ।
सकलावञ्चकयोग-प्राप्ति-फलोऽभ्युदय-सचिवश्च ।।८-१३।।

१२६. लव-मात्रमयं नियमादुचितोचितभाववृद्धिकरणेन ।
क्षान्त्यादि-युतैर्मैत्र्यादि-सङ्गतैर्बृंहणीय इति ।।८-१४।।

१२७. निरपायः सिद्धार्थः स्वात्मस्थो मन्त्राडसङ्गश्च ।
आनन्दो ब्रह्मरसश्चिन्त्यस्तत्त्वज्ञ-मुष्टिरियम् ।।८-१५।।

१२८. अष्टौ दिवसान् यावत् पूजाऽविच्छेदतोऽस्य कर्त्तव्या ।
दानं च यथा-विभवं दातव्यं सर्वसत्त्वेभ्यः ।।८-१६।।

## ।। नवमोऽधिकारः ।।

१२९. स्नान-विलेपन-सुसुगन्धि-पुष्प-धूपादिभिः शुभैः कान्तम् ।
विभवानुसारतो यत्काले नियतं विधानेन ।।९-१।।

१३०. अनुपकृत-पर-हित-रतः शिवदस्त्रिदशेश-पूजितो भगवान् ।
पूज्यो हित-कामानामिति-भक्त्या पूजनं पूजा ।।९-२।।

१३१. पञ्चोपचार-युक्ता काचिच्चाष्टोपचारयुक्ता स्यात् ।
ऋद्धि-विशेषादन्या प्रोक्ता सर्वोपचारेति ।।९-३।।

१३२. न्यायार्जितेन परिशोधितेन वित्तेन निरवशेषेयम् ।
कर्तव्या बुद्धिमता प्रयुक्त-सत्सिद्धियोगेन ।।९-४।।

१३३. शुचिनात्मसंयमपरं सितशुभवस्त्रेण वचनसारेण ।
आशंसा-रहितेन च तथा तथा भाववृद्ध्योच्चैः ॥९-५॥

१३४. पिण्ड-क्रिया-गुण-गतैर्गम्भीरैर्विविध-वर्ण-संयुक्तैः ।
आशय-विशुद्धि-जनकैः संवेग-परायणैः पुण्यैः ॥९-६॥

१३५. पाप-निवेदन-गर्भैः प्रणिधान-पुरस्सरैर्विचित्रार्थैः ।
अस्खलितादि-गुण-युतैः स्तोत्रैश्च महामति-ग्रथितैः ॥९-७॥

१३६. शुभभावार्थं पूजा स्तोत्रेभ्यः स च परः शुभो भवति ।
सद्भूत-गुणोत्कीर्त्तन-संवेगात्समरसापत्त्या ॥९-८॥

१३७. कायादि-योग-सारा त्रिविधा तच्छुद्ध्युपात्त-वित्तेन ।
या तदतिचार-रहिता सा परमान्ये तु समयविदः ॥९-९॥

१३८. विघ्नोपशमन्याद्या गीताभ्युदयप्रसाधनी चान्या ।
निर्वाणसाधनीति च फलदा तु यथार्थ-संज्ञाभिः ॥९-१०॥

१३९. प्रवरं पुष्पादि सदा चाद्यायां सेवते तु तद्दाता ।
आनयति चान्यतोऽपि हि नियमादेव द्वितीयायाम् ॥९-११॥

१४०. त्रैलोक्यसुन्दरं यन्मनसाऽऽपादयति तत्तु चरमायाम् ।
अखिल-गुणाधिक-सद्योग-सार-सद्ब्रह्म-याग-परः ॥९-१२॥

१४१. स्नानादौ कायवधो न चोपकारो जिनस्य कश्चिदपि ।
कृतकृत्यश्च स भगवान् व्यर्था पूजेति मुग्धमतिः ॥९-१३॥

१४२. कूपोदाहरणादिह कायवधोऽपि गुणवान् मतो गृहिणः ।
मन्त्रादेरिव च ततस्तदनुपकारेऽपि फल-भावः ॥९-१४॥

१४३. कृतकृत्यत्त्वादेव च तत्पूजा फलवती गुणोत्कर्षात् ।
तस्मादव्यर्थैषाऽऽरम्भवतोऽन्यत्र विमलधियः ॥९-१५॥

१४४. इति जिनपूजां धन्यः शृण्वन् कुर्वंस्तदोचितां नियमात् ।
भव-विरह-कारणं खलु सदनुष्ठानं द्रुतं लभते ॥९-१६॥

## ।। दशमोऽधिकारः ।।

१४५. सदनुष्ठानमतः खलु बीजन्यासात्प्रशान्त-वाहितया ।
सञ्जायते नियोगात्पुंसां पुण्योदय-सहायम् ।।१०-१।।

१४६. तत्प्रीति-भक्ति-वचनासङ्गोपपदं चतुर्विधं गीतम् ।
तत्त्वाभिज्ञैः परम-पद-साधनं सर्वमेवैतत् ।।१०- २।।

१४७. यत्रादरोऽस्ति परमः प्रीतिश्च हितोदया भवति कर्त्तुः ।
शेष-त्यागेन करोति यच्च तत्प्रीत्यनुष्ठानम् ।।१०-३।।

१४८. गौरव-विशेष-योगाद्बुद्धिमतो यद्विशुद्धतरयोगम् ।
क्रिययेतरतुल्यमपि ज्ञेयं तद्भक्त्यनुष्ठानम् ।।१०- ४।।

१४९. अत्यन्त-वल्लभा खलु पत्नी तद्वद्धिता च जननीति ।
तुल्यमपि कृत्यमनयोर्ज्ञातं स्यात्प्रीतिभक्तिगतम् ।।१०-५।।

१५०. वचनात्मिका प्रवृत्तिः सर्वत्रौचित्ययोगतो या तु ।
वचनानुष्ठानमिदं चारित्रवतो नियोगेन ।।१०-६।।

१५१. यत्त्वभ्यासातिशयात्सात्मीभूतमिव चेष्ट्यते सद्भिः ।
तदसङ्गानुष्ठानं भवति त्वेतत्तदावेधात् ।।१०-७।।

१५२. चक्र-भ्रमणं दण्डात्तदभावे चैव यत्परं भवति ।
वचनासङ्गानुष्ठानयोस्तु तज् ज्ञापकं ज्ञेयम् ।।१०-८।।

१५३. अभ्युदयफले चाद्ये निःश्रेयससाधने तथा चरमे ।
एतदनुष्ठानानां विज्ञेये इह गतापाये ।।१०-९।।

१५४. उपकार्यपकारि-विपाक-वचन-धर्मोत्तरा मता क्षान्तिः ।
आद्य-द्वये त्रिभेदा चरम-द्वितये द्विभेदेति ।।१०-१०।।

१५५. चरमाद्यायां सूक्ष्मा अतिचाराः प्रायशोऽतिविरलाश्च ।
आद्य-त्रये त्वमी स्युः स्थूलाश्च तथा घनाश्चैव ।।१०-११।।

१५६. श्रुत-मय-मात्रापोहाच्चिन्ता-मय-भावना-मये भवतः ।
ज्ञाने परे यथार्हं गुरु-भक्ति-विधान-सल्लिङ्गे ।।१०- १२।।

१५७. उदकपयोऽमृतकल्पं पुंसां सज्ज्ञानमेवमाख्यातम् ।
विधियत्नवत्तु गुरुभिर्विषय-तृडपहारि नियमेन ।।१०-१३।।

१५८. शृण्वन्नपि सिद्धान्तं विषय-पिपासातिरेकतः पापः ।
प्राप्नोति न संवेगं तदापि यः सोऽचिकित्स्य इति ।।१०-१४।।

१५९. नैवंविधस्य शस्तं मण्डल्युपवेशनप्रदानमपि ।
कुर्वन्नेतद्गुरुरपि तदधिकदोषोऽवगन्तव्यः ।।१०- १५।।

१६०. यः शृण्वन्संवेगं गच्छति तस्याऽऽद्यमिह मतं ज्ञानम् ।
गुरुभक्त्यादिविधानात्कारण मेतद् द्वयस्येष्टम् ।।१०-१६।।

## ।। एकादशोऽधिकारः ।।

१६१. शुश्रूषा चेहाद्यं लिङ्गं खलु वर्णयन्ति विद्वांसः ।
तदभावेऽपि श्रावणमसिरावनि-कूप-खनन-समम् ।।११-१।।

१६२. शुश्रूषापि द्विविधा परमेतरभेदतो बुधैरूक्ता ।
परमा क्षयोपशमतः परमाच्छ्रवणादिसिद्धिफला ।।११- २।।

१६३. यूनो वैदग्ध्यवतः कान्ता-युक्तस्य कामिनोऽपि दृढम् ।
किन्नर-गेय-श्रवणादधिको धर्मश्रुतौ रागः ।।११- ३।

१६४. गुरुभक्तिः परमाऽस्यां विधौ प्रयत्नस्तथाऽऽदृतिः[१] करणे ।
सन्द्ग्रन्थाप्तिः श्रवणं तत्त्वाभिनिवेश-परम-फलम् ।।११-४।।

१६५. विपरीता त्वितरा स्यात्प्रायोऽनर्थाय देहिनां सा तु ।
या सुप्त-नृप-कथानक-शुश्रूषा-वत्स्थिता लोके ।।११-५।।

१६६. ऊहादि-रहित-माद्यं तद्युक्तं मध्यमं भवेज्ज्ञानम् ।
चरमं हित-करण-फलं विपर्ययो मोहतोऽन्य इति ।।११-६।।

१६७. वाक्यार्थ-मात्र-विषयं कोष्ठक-गत-बीज-सन्निभं ज्ञानम् ।
श्रुत-मयमिह विज्ञेयं मिथ्याभिनिवेशरहितमलम् ।।११-७।।

१६८. यत्तु महा-वाक्यार्थजमतिसूक्ष्म-सुयुक्ति-चिन्तयोपेतम् ।
उदक इव तैल-बिन्दुर्विसर्पि चिन्तामयं तत्स्यात् ।।११-८।।

१. धृतिरिति क्वचित्पुस्तके पाठान्तरम् ।

१६९. ऐदम्पर्यगतं यद्विध्यादौ यत्नवत्तथैवोच्चैः ।
एतत्तु भावना-मयमशुद्ध-सद्रत्न-दीप्ति-समम् ।।११-९।।

१७०. आद्य इह मनाक्पुंसस्तद्रागाद्दर्शनग्रहो भवति ।
न भवत्यसौ द्वितीये चिन्ता-योगात् कदाचिदपि ।।११-१०।।

१७१. चारि-चरक-सञ्जीविन्यचरक-चारण-विधानतश्चरमे ।
सर्वत्र हिता वृत्तिर्गाम्भीर्यात्समरसापत्त्या ।।११- ११।।

१७२. गुर्वादि-विनय-रहितस्य यस्तु मिथ्यात्त्व-दोषतो वचनात् ।
दीप इव मण्डलगतो बोधः स विपर्ययः पापः ।।११-१२।।

१७३. दण्डी-खण्ड-निवसनं भस्मादि-विभूषितं सतां शोच्यम् ।
पश्यत्यात्मानमलं ग्रही नरेन्द्रादपि ह्यधिकम् ।।११-१३।।

१७४. मोह-विकार-समेतः पश्यत्याऽऽत्मानमेवमकृतार्थम् ।
तद् व्यत्यय-लिङ्गरतं कृतार्थमिति तद्ग्रहादेव ।।११- १४।।

१७५. सम्यग्दर्शन-योगाज्ज्ञानं तद्ग्रन्थिभेदतः परमम् ।
सोऽपूर्वकरणतः स्याज्ज्ञेयं लोकोत्तरं तच्च ।।११-१५।।

१७६. लोकोत्तरस्य तस्मान्महानुभावस्य शान्त-चित्तस्य ।
औचित्त्यवतो ज्ञानं शेषस्य विपर्ययो ज्ञेयः ।।११-१६।।

## ।। द्वादशोऽधिकारः ।।

१७७. अस्मिन्सति दीक्षाया अधिकारी तत्त्वतो भवति सत्त्वः ।
इतरस्य पुनर्दीक्षा वसन्त-नृप-सन्निभा ज्ञेया ।।१२-१।।

१७८. श्रेयो-दानादशिवक्ष-पणाच्च सतां मतेह दीक्षेति ।
सा ज्ञानिनो नियोगाद्यथोदितस्यैव साध्वीति ।।१२- २।।

१७९. यो निरनुबन्धदोषाच्छ्राद्धोऽनाभोगवान् वृजिन-भीरुः ।
गुरु-भक्तो ग्रह-रहितः सोऽपि ज्ञान्येव तत्फलतः ।।१२-३।।

१८०. चक्षुष्मानेकः स्यादन्धोऽन्यस्तन्मतानुवृत्तिपरः ।
गन्तारौ गन्तव्यं प्राप्नुत एतौ युगपदेव ।।१२-४।।

१८१. यस्यास्ति सत्क्रियायामित्थं सामर्थ्य-योग्यताऽविकला ।
गुरु-भाव-प्रतिबन्धाद्दीक्षोचित एव सोऽपि किल ।।१२-५।।

१८२. देयाऽस्मै विधि-पूर्वं सम्यक्तन्त्रानुसारतो दीक्षा ।
निर्वाण-बीजमेषेत्यनिष्टफल दाऽन्यथाऽत्यन्तम् ।।१२- ६।।

१८३. देश-समग्राख्येयं विरतिर्न्यासोऽत्र तद्वति च सम्यक् ।
तन्नामादि-स्थापनमविद्रुतं स्व-गुरु-योजनतः ।।१२-७।।

१८४. नाम-निमित्तं तत्त्वं तथा तथा चोद्धृतं पुरा यदिह ।
तत्स्थापना तु दीक्षा तत्त्वेनान्यस्तदुपचारः ।।१२-८।।

१८५. कीर्त्यारोग्य-ध्रुव-पद-सम्प्राप्तेः सूचकानि नियमेन ।
नामादीन्याचार्या वदन्ति तत्तेषु यतितव्यम् ।।१२- ९।।

१८६. तत्संस्कारादेषा दीक्षा सम्पद्यते महा-पुंसः ।
पाप-विषापगमात् खलु सम्यग्गुरु-धारणायोगात् ।।१२-१०।।

१८७. सम्पन्नायां चास्यां लिङ्गं व्यावर्णयन्ति समयविदः ।
धर्मैकनिष्ठतैव हि शेषत्यागेन विधिपूर्वम् ।।१२-११।।

१८८. वचन-क्षान्तिरिहादौ धर्म-क्षान्त्यादि-साधनं भवति ।
शुद्धं च तपो नियमाद्यमश्च सत्यं च शौचं च ।।१२-१२।।

१८९. आकिञ्चन्यं मुख्यं ब्रह्मापि परं सदागमविशुद्धम् ।
सर्वं शुक्लमिदं खलु नियमात्संवत्सरादूर्ध्वम् ।।१२-१३।।

१९०. ध्यानाध्ययनाभिरतिः प्रथमं पश्चात्तु भवति तन्मयता ।
सूक्ष्मार्थाऽऽलोचनया संवेगः स्पर्शयोगश्च ।।१२-१४।।

१९१. स्पर्शस्तत्तत्त्वाप्तिः संवेदन-मात्रमविदितं त्वन्यत् ।
वन्ध्यमपि स्यादेतत्स्पर्शस्त्वक्षेप-तत्फलदः ।।१२-१५।।

१९२. व्याध्यभिभूतो यद्वन्निर्विण्णस्तेन तत्क्रियां यत्नात् ।
सम्यक्करोति तद्वद्दीक्षित इह साधुसच्चेष्टाम् ।।१२-१६।।

## ।। त्रयोदशोऽधिकारः ।।

१९३. गुरु-विनयः स्वाध्यायो योगाभ्यासः परार्थकरणं च ।
इतिकर्त्तव्यतया सह विज्ञेया साधुसच्चेष्टा ।।१३-१।।

१९४. औचित्याद्गुरुवृत्तिर्बहुमानस्तत्कृतज्ञताचित्तम् ।
आज्ञा-योगस्तत्सत्य-करणता चेति गुरु-विनयः ।।१३-२।।

१९५. यत्तु खलु वाचनादेरासेवनमत्र भवति विधिपूर्वम् ।
धर्म-कथान्तं क्रमशस्तत्स्वाध्यायो विनिर्दिष्टः ।।१३-३।।

१९६. स्थानोर्णार्थालम्बन-तदन्य-योग-परिभावनं सम्यक् ।
पर-तत्त्व-योजनमलं योगाभ्यास इति तत्त्वविदः ।।१३-४।।

१९७. विहितानुष्ठानपरस्य तत्त्वतो योग-शुद्धि-सचिवस्य ।
भिक्षाटनादि सर्वं परार्थ-करणं यतेर्ज्ञेयम् ।।१३-५।।

१९८. सर्वत्राऽनाकुलता यतिभावाव्ययपरा समासेन ।
कालादिग्रहणविधौ क्रियेतिकर्त्तव्यता भवति ।।१३-६।।

१९९. इति चेष्टावत उच्चैर्विशुद्ध-भावस्य सद्यतेः क्षिप्रम् ।
मैत्री-करुणा-मुदितोपेक्षाः किल सिद्धिमुपयान्ति ।।१३-७।।

२००. एताश्चतुर्विधाः खलु भवन्ति सामान्यतश्चतस्त्रोऽपि ।
एतद्भाव-परिणतावन्ते मुक्तिर्न तत्रैताः ।।१३-८।।

२०१. उपकारि-स्वजनेतर-सामान्य-गता चतुर्विधा मैत्री ।
मोहासुखसंवेगान्य-हित-युता चैव करुणेति ।।१३-९।।

२०२. सुखमात्रे सद्धेतावनुबन्धयुते परे च मुदिता तु ।
करुणानुबन्ध-निर्वेद-तत्त्व-सारा ह्युपेक्षेति ।।१३-१०।।

२०३. एताः खल्वभ्यासात् क्रमेण वचनानुसारिणां पुंसाम् ।
सद्वृत्तानां सततं श्राद्धानां परिणमन्त्युच्चैः ।।१३-११।।

२०४. एतद्रहितं तु तथा तत्त्वाभ्यासात्परार्थकार्येव ।
सद्बोधमात्रमेव हि चित्तं निष्पन्न-योगानाम् ।।१३-१२।।

२०५. अभ्यासोऽपि प्रायः प्रभूत-जन्मानुगो भवति शुद्धः ।
कुलयोग्यादीनामिह तन्मूलाधान-युक्तानाम् ।।१३-१३।।

२०६. अविराधनया यतते यस्तस्यायमिह सिद्धिमुपयाति ।
गुरु-विनयः श्रुत-गर्भो मूलं चास्या अपि ज्ञेयः ।।१३-१४।।

२०७. सिद्धान्त-कथा सत्सङ्गमश्च मृत्यु-परिभावनं चैव ।
दुष्कृत-सुकृत-विपाकालोचनमथ मूलमस्यापि ।।१३-१५।।

२०८. एतस्मिन् खलु यत्नो विदुषा सम्यक् सदैव कर्त्तव्यः ।
आमूलमिदं परमं सर्वस्य हि योगमार्गस्य ।।१३-१६।।

## ।। चतुर्दशोऽधिकारः ।।

२०९. सालम्बनो निरालम्बनश्च योगः परो द्विधा ज्ञेयः ।
जिन-रूप-ध्यानं खल्वाद्यस्तत् तत्त्वगस्त्वपरः ।।१४-१।।

२१०. अष्ट-पृथग्जन-चित्त-त्यागाद्योगि-कुल-चित्त-योगेन ।
जिन-रूपं ध्यातव्यं योग-विधावन्यथा दोषः ।।१४-२।।

२११. खेदोद्वेग-क्षेपोत्थान-भ्रान्त्यन्यमुद्रुगासङ्गैः ।
युक्तानि हि चित्तानि प्रबन्धतो वर्जयेन्मतिमान् ।।१४-३।।

२१२. खेदे दार्ढ्याभावान्न प्रणिधानमिह सुन्दरं भवति ।
एतच्चेह प्रवरं कृषि-कर्मणि सलिलवज्ज्ञेयम् ।।१४-४।।

२१३. उद्वेगे विद्वेषाद्विष्टिसमं करणमस्य पापेन ।
योगि-कुल-जन्म-बाधकमलमेतत्तद्विदामिष्टम् ।।१४-५।।

२१४. क्षेपेऽपि चाप्रबन्धादिष्टफल-समृद्धये न जात्वेतत् ।
नासकृदुत्पाटनतः शालिरपि फलावहः पुंसः ।।१४-६।।

२१५. उत्थाने निर्वेदात्करणमकरणोदयं सदैवास्य ।
अत्याग-त्यागोचितमेतत्तु स्व-समयेऽपि मतम् ।।१४-७।।

२१६. भ्रान्तौ विभ्रम-योगान्न हि संस्कारः कृतेतरादि-गतः ।
तदभावे तत्करणं प्रक्रान्त-विरोध्यनिष्ट-फलम् ।।१४-८।।

२१७. अन्यमुदि तत्र रागात्तदनादरताऽर्थतो महापाया ।
सर्वानर्थनिमित्तं मुद्विषयाङ्गार-वृष्ट्याभा ।।१४-९।।

२१८. रुजि निज-जात्युच्छेदात् करणमपि हि नेष्ट-सिद्धये नियमात् ।
अस्येत्यननुष्ठानं तेनैतद्वन्ध्यफलमेव ।।१४-१०।।

२१९. आसङ्गेऽप्यविधानादसङ्ग-सक्त्युचितमित्यफलमेतत् ।
भवतीष्ट-फलदमुच्चैस्तदप्यसङ्गं यतः परमम् ।।१४-११।।

२२०. एतद्दोष-विमुक्तं शान्तोदात्तादि-भाव-संयुक्तम् ।
सततं परार्थ-नियतं सङ्क्लेश-विवर्जितं चैव ।।१४-१२।।

२२१. सुस्वप्न-दर्शन-परं समुल्लसन्गुण-गणौघमत्यन्तम् ।
कल्प-तरु-बीज-कल्पं शुभोदयं योगिनां चित्तम् ।।१४-१३।।

२२२. एवंविधमिह चित्तं भवति प्रायः प्रवृत्त-चक्रस्य ।
ध्यानमपि शस्तमस्य त्वधिकृतमित्याहुराचार्याः ।।१४-१४।।

२२३. शुद्धे विविक्त-देशे सम्यक्संयमित-काय-योगस्य ।
कायोत्सर्गेण दृढं यद्वा पर्यङ्कबन्धेन ।।१४-१५।।

२२४. साध्वागमानुसाराच्चेतो विन्यस्य भगवति विशुद्धम् ।
स्पर्शावेधात्तत्सिद्ध-योगि-संस्मरणयोगेन ।।१४-१६।।

## ।। पञ्चदशोऽधिकारः ।।

२२५. सर्व-जगद्धितमनुपममतिशय-सन्दोहमृद्धि-संयुक्तम् ।
ध्येयं जिनेन्द्र-रूपं सदसि गदत्तत्परं चैव ।।१५-१।।

२२६. सिंहासनोपविष्टं छत्र-त्रय-कल्प-पादपस्याधः ।
तत्त्वार्थ-सम्प्रवृत्तं देशनया कान्तमत्यन्तम् ।।१५-२।।

२२७. आधीनां परमौषधमव्याहतमखिल-सम्पदां बीजम् ।
चक्रादि-लक्षण-युतं सर्वोत्तम-पुण्य-निर्माणम् ।।१५-३।।

२२८. निर्वाण-साधनं भुवि भव्यानामग्र्यमतुलमाहात्म्यम् ।
सुर-सिद्ध-योगि-वन्द्यं वरेण्य-शब्दाभिधेयं च ।।१५-४।।

२२९. परिणत एतस्मिन् सति सद्ध्याने क्षीण-किल्बिषो जीवः ।
निर्वाण-पदासन्नः शुक्लाभोगो विगत-मोहः ।।१५-५।।

२३०. चरमावञ्चकयोगात्प्रातिभ-सञ्जात-तत्त्व-संदृष्टिः ।
इदमपरं तत्त्वं तद्यद्वशतस्त्वस्त्यतोऽप्यन्यत् ।।१५-६।।

२३१. तस्मिन् दृष्टे दृष्टं तद्भूतं तत्परं मतं ब्रह्म ।
तद्योगादस्यापि ह्येषा त्रैलोक्यसुन्दरता ।।१५-७।।

२३२. सामर्थ्य-योगतो या तत्र दिदृक्षेत्यसङ्गशक्त्याढ्या ।
साऽनालम्बनयोगः प्रोक्तस्तद्-दर्शनं [A]यावत् ।।१५-८।।

२३३. तत्राऽप्रतिष्ठितोऽयं यतः प्रवृत्तश्च तत्त्वतस्तत्र ।
सर्वोत्तमानुजः खलु तेनाऽनालम्बनो गीतः ।।१५-९।।

२३४. द्रागस्मात्तद्दर्शनमिषु-पात-ज्ञात-मात्रतो ज्ञेयम् ।
एतच्च केवलं तज्ज्ञानं यत्तत्परं ज्योतिः ।।१५-१०।।

२३५. आत्मस्थं त्रैलोक्य-प्रकाशकं निष्क्रियं परानन्दम् ।
तीतादि-परिच्छेदकमलं ध्रुवं चेति समयज्ञाः ।।१५-११।।

२३६. एतद्योग-फलं तत्परापरं दृश्यते परमनेन ।
तत्तत्त्वं यद्दृष्ट्वा निवर्तते दर्शनाकाङ्क्षा ।।१५-१२।।

२३७. तनु-करणादि-विरहितं तच्चाचिन्त्य-गुण-समुदयं सूक्ष्मम् ।
त्रैलोक्य-मस्तकस्थं निवृत्त-जन्मादि-सङ्क्लेशम् ।।१५-१३।।

२३८. ज्योतिः परं परस्तात्तमसो यद्गीयते महामुनिभिः ।
आदित्य-वर्णममलं ब्रह्माद्यैरक्षरं ब्रह्म ।।१५-१४।।

२३९. नित्यं प्रकृति-वियुक्तं लोकालोकावलोकनाभोगम् ।
स्तिमित-तरङ्गोदधि-सममवर्णमस्पर्शमगुरुलघु ।।१५-१५।।

२४०. सर्वाबाधा-रहितं परमानन्द-सुख-सङ्गतमसङ्गम् ।
निःशेष-कलातीतं सदाशिवाद्यादि-पद-वाच्यम् ।।१५-१६।।

---

A. तददर्शन... इति योगदीपिका सम्मतः पाठः ।

## ।। षोडशोऽधिकारः ।।

२४१. एतद्-दृष्ट्वा तत्त्वं परममनेनैव समरसापत्तिः ।
सञ्जायतेऽस्य परमा परमानन्द इति यामाहुः ।।१६-१।।

२४२. सैषाऽविद्या-रहितावस्था परमात्म-शब्द-वाच्येति ।
एषैव च विज्ञेया रागादि-विवर्जिता तथता ।।१६-२।।

२४३. वैशेषिक-गुण-रहितः पुरुषोऽस्यामेव भवति तत्त्वेन ।
विध्यात-दीप-कल्पस्य हन्त जात्यन्तराप्राप्तेः ।।१६-३।।

२४४. एवं पशुत्त्व-विगमो दुःखान्तो भूत-विगम इत्यादि ।
अन्यदपि तन्त्र-सिद्धं सर्वमवस्थान्तरेऽत्रैव ।।१६-४।।

२४५. परिणामिन्यात्मनि सति तत्तद्-ध्वनि-वाच्यमेतदखिलं स्यात् ।
अर्थान्तरे च तत्त्वेऽविद्यादौ वस्तुसत्येव ।।१६-५।।

२४६. तद्योग-योग्यतायां चित्रायां चैव नान्यथा नियमात् ।
परिभावनीयमेतद्विद्वद्भिस्तत्त्व-दृष्ट्योच्चैः ।।१६-६।।

२४७. पुरुषाद्वैतं तु यदा भवति विशिष्टमथ च बोध-मात्रं वा ।
भव-भव-विगम-विभेदस्तदा कथं युज्यते मुख्यः ।।१६-७।।

२४८. अग्नि-जल-भूमयो यत्परिताप-करा भवेऽनुभव-सिद्धाः ।
रागादयश्च रौद्रा असत्प्रवृत्त्यास्पदं लोके ।।१६-८।।

२४९. परिकल्पिता यदि ततो न सन्ति तत्त्वेन कथममी स्युरिति ।
तन्मात्र एव तत्त्वे भव-भव-विगमौ कथं युक्तौ ।।१६-९।।

२५०. परिकल्पनापि[A] चैषा हन्त विकल्पात्मिका न सम्भवति ।
तन्मात्र एव तत्त्वे यदि वाऽभावो न जात्वस्याः ।।१६-१०।।

२५१. ऐदम्पर्यं शुद्ध्यति यत्रासावागमः सुपरिशुद्धः ।
तदभावे तद्देशः कश्चित्स्यादन्यथाग्रहणात् ।।१६-११।।

२५२. तस्माद्यथोक्तमेतत् त्रितयं नियमेन धीधनैः पुम्भिः ।
भव-भव-विगम-निबन्धनमालोच्यं शान्त-चेतोभिः ।।१६-१२।।

*A*. कल्पिता इति योगदीपिका सम्मतः पाठः ।

२५३. तत्रापि च न द्वेषः कार्यो विषयस्तु यत्नतो मृग्यः ।
तस्यापि न सद्वचनं सर्वं यत्प्रवचनादन्यत् ।।१६-१३।।

२५४. अद्वेषो जिज्ञासा शुश्रूषा श्रवण-बोध-मीमांसाः ।
परिशुद्धा प्रतिपत्तिः प्रवृत्तिरष्टाङ्गिकी तत्त्वे ।।१६-१४।।

२५५. गर्भार्थं खल्वेषां भावानां यत्नतः समालोच्य ।
पुंसा प्रवर्त्तितव्यं कुशले न्यायः सतामेषः ।।१६-१५।।

२५६. एते प्रवचनतः खलु समुद्धृता मन्द-मति-हितार्थं तु ।
आत्मानुस्मरणाय च भावा भव-विरह-सिद्धि-फलाः ।।१६-१६।।

२५७. धर्म-श्रवणे यत्नः सततं कार्यो बहु-श्रुत-समीपे ।
हित-काङ्क्षिभिर्नृसिंहैर्वचनं ननु हारिभद्रमिदम् ।।१६-१७।।

।। इति षोडशाधिकारप्रकरणम् ।।

।। मूलमात्रम् ।।

गुणः कः प्रथमं स्तुत्यः
हरिभद्रसूरीशितुः ।
वैदुषी नम्रता किं वा
शास्त्राणि वा समर्पणम् ।।

– मुनि श्री प्रशमरति विजयः

नमो
पवयणस्स

प्रवचनम्

प्रवचनम्